नं. २३

[illegible]

शृङ्गार तिलकं

का. गा.

२७४२

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शृङ्गारतिलकम् ।

महाकवि श्रीकालिदास विरचितम् ।

वैद्यमहामहोपाध्याय श्रीमत्कविराजचन्द्रमजुमदार

प्रणीत शान्तिपद्यटीकयासमेतम् ।

श्रीयुक्त भुवनचन्द्रवसाकमहोदयस्यानुरोधेन

श्रीकैलाशचन्द्रसेनगुप्तेन परिशोधितम् ।

तृतीयसंस्करणम् ।

कलिकाताराजधान्याम्

श्रीउदयचरणपालेन नूतनवाल्मीकियन्त्रे मुद्रितम् ।

(३९ नं शिवनारायणदासेर लेन ।)

निमतलाघाटष्ट्रीट ८ नं भवनात् प्रकाशितम् ।

ई० १८८६

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शृङ्गारतिलकम्।

महाकवि श्रीकालिदास विरचितम्।

वैद्यमहामहोपाध्याय श्रीमत्कविराजचन्द्र मजुमदार

प्रणीतशान्तिपञ्चटीकया समेतम्।

श्रीयुक्तभुवनचन्द्रवसाक महोदयस्यानुरोधेन

श्रीकैलासचन्द्र सेन गुप्तेन परिशोधितम्।

कलिकाताराजधान्याम्

श्रीउदयचरणपालेन नूतनवाल्मीकियन्त्रे मुद्रितम्।

(२९ नं शिवनारायण दासेर लेन।)

निमतला घाट इष्ट्रीट ८ नं भवनात् प्रकाशितम्।

ई० १८८६

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्रीदुर्गायै नमः ।

विज्ञप्तिरियम् ।

महाकुलसम्पन्नभिषग्वृन्दवन्दितकुलविष्णुदासकुलसम्भूत: कविवत् कविकुलाग्रतं सोऽनन्यसाधारण धीविद्यासाध्योत्त-रराघवपाण्डवीयादिग्रन्थप्रणयनैः क्षितितले लब्धैकविमलयशाःकवीन्द्रवरः श्रीमल्लविराजचन्द्रो महाकविगणाग्रण्यश्रीमत्कालिदासविरचितद्वाविंशतिश्लोकसम्पूर्णशृङ्गारतिलकनामग्रन्थस्य सर्व्वंजनविज्ञातशृङ्गाररसविपरीतशान्तिरसव्याख्यायिनीं घोरसंसारपाशमोचमोचैकसाधनशान्तिरसाकृष्टमनसां विदुषां स्वान्तोल्लासिनीं टीकां प्रणीतवान् । सटीकरघुवंशादिमहाकाव्यमुद्राङ्कयद्भिः सूरिभिर्ग्रन्थस्य क्षुद्रकायत्वादलाभाद्वा शान्तिपक्षटीकयाशृङ्गारतिलकं न मुद्रितम् । अधुना तदर्थकौशलरसोत्तमतोषितमनस आयुर्वेदादि विविधसंस्कृतग्रन्थ मुद्राङ्कणप्रभूतयशसोदेशभावुक भावनैकनिश्चयस्य तन्मुद्राङ्कणोत्सुकस्य श्रीयुक्तभुवनचन्द्रवसाकमहोदयस्यानुरोधेन मया यथासाध्यं परिशोधितम् ।

अज्ञानतो मेऽनवधानतो वा शुद्धेषु योऽस्त्यत्र स शोधनीयः ।
वर्णादिदोषः कृतिभि र्हताशै र्यथा सुवर्णस्य हि दोषहारैः ॥

काशीयानी निवासिनः ।
श्रीकैलासचन्द्र सेनगुप्तस्य ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अथ शृङ्गारतिलकम्।

बाहू द्वौचमृणालमास्यकमलं लावण्यलीलाजलं श्रोणीतीर्थशिला च नेत्रसफरं धम्मिल्ल

यदङ्घ्रिवारिजरजः परमाणोरनुग्रहात्। नश्यत्यज्ञानतिमिरं तं वन्दे गुरुमव्ययम्। श्रीकालिदासेन कवीन्द्रवृन्द शिरोवतंसेन कृतेष्वमीषु। श्लोकेषु मौद्गुल्यकुलप्रसूत स्तनोति टीकां कविराजचन्द्रः। सर्वेऽत्र शृङ्गाररसस्य पक्षं पश्यन्ति शान्तस्य तु वेत्ति कश्चित्। प्रच्छन्नभूतं सुतरां यथास्मिन् देहे निविष्टं परमं पुमांसम्। सम्प्रदायविरहाद्विचक्षण शान्तिपक्षविवृतेर्नकूटता। दृष्यतां समवलम्बतां पुनःकल्पनान्तरमतिं समृच्छताम्।

इह महाकवि श्रीकालिदासः प्रसादवत्पद प्रतिपादितशृङ्गाररसतिरोहितं काष्ठपुटकाधिकरणकस्थगितमणिन्यायेन, शान्तिरसमाहितवान् तादृशशब्दोपन्यासेन च शृङ्गाररसस्यापाततोमधुरत्वं सर्वसाधारणत्वञ्च शान्तस्य पुनस्तद्व्यतिरेकित्वमभिप्रेतवान्। तत्र प्रथमं शान्तिवर्त्मन्युपदेष्टव्ये कान्तायाः शान्त्यन्तरायभूतत्वात् परिहारमुपदिशति।

बाहूइत्यादि। हे विद्वन्नित्यर्थाद्दग्धानां लोकानां व्याप्यभूतानां हतादिवद्दग्धशब्दः क्षेपविषये यथाप्रयुक्तं भवभूतिना दग्धहृदय कोऽयमाकस्मिकस्ते पारिप्लवी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शैवालकम् । कान्तायाः स्तनचक्रवाकयुगलं कन्दर्पबाणानलैर्दग्धानामवगाहनाय विधिना रम्यं सरोनिर्मितम् ॥ १ ॥ आयाता मधुयामिनी यदि पुनर्नायातएव प्रभुः प्राणायान्तु विभावसौ यदि पुनर्जन्मग्रहं प्रार्थये । व्याधः

विकार इति । कन्दर्पबाणानलैः कामशराग्निभिः करणैर्गाहनाय, आकुलीकरणाय, विधिना निर्म्मितं कान्ताया देहरूपं सरोऽरम्यमरमणीयं, अव, जानीहि । तव कदाचि न रतिःकार्य्या तन्निर्म्माणस्य परपीड़नमात्रप्रयोजनकत्वा न विदग्धोहो युक्तः अतो दग्धानामित्युपन्यस्तम् । सरःसाधर्म्म्यमाह बाहु इत्यादिना तीर्थघिला अवतार पाषाणः, धम्मिल्यः संयताः कचा इत्यमरः । अन्यत्सुबोधं, तीर्थं शास्त्राध्वर सैत्रोपायनारीरजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु, इति मेदिनिः । अवतारो घट्टः । वष रत्ते गतौ कान्तौ प्रीतौ त्रसा स्मृतौ स्रुतौ । स्वाम्यर्थेऽवगमे कामे क्षताविति वोपदेवः ॥ १ ॥

आयातेति । आत्मज्ञानात्मस्य निश्चितमरणावश्यभावस्य प्राणत्यागायोद्यतस्य कस्यचिदुक्तिरियम् । यामिनी कालरात्रि मरणकरी, मधु, नविद्यते धुः कम्पनमाभभवायस्य तादृशं यथास्यात्तथा आयाता आयास्यति खस्तनी एतदनन्तरम् आङ्निश्चये आङ् ज्ञाननिश्चयस्मृत्योरिति मेदिनिः । यदि पुनःप्रभुरात्मा न याता नज्ञातः आत्मज्ञानं नात्मज्ञानमित्यर्थः । न इत्यतः मा: पीड़ायां, आसु स्यात्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कोकिलवन्धने हिमकरध्वंसे च राहुग्रहः कन्दर्पेहरनेत्रदीधितिरहं प्राणेश्वरे मन्मथः ॥ २ ॥
इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन दन्तमधरं नवपल्लवेन। अङ्गानि चम्पकदलैः स विधाय वेधाः, कान्ते कथं घटितवानुपलेन चेतः ॥३॥

कोपपीड़योरित्यमरः। तदा प्राणा विभावसौ वह्नौ यान्तु, अग्निरेव प्रवेष्टव्य इत्यर्थः। अहं पुनर्जन्मग्रहं न प्रार्थये इत्यतोऽशब्दो नजर्थः प्रत्येतव्यः, अशब्दःस्यादभावेऽपि स्वल्पार्थे प्रतिषेधयोरिति मेदिनिः। यदिशब्दो गर्हायां यदि गर्हाविकल्पयोरिति कोषः। नानारूपेण सकलसङ्घातुकत्वं बोधयितुं कालरात्रिं विशिनष्टि व्याधः कोकिलबन्धने इत्यादि तस्यास्तत्त्वनिरूपणाय पुनर्विशिनष्टि इमन्मथः प्राणेश्वरेति इः कामस्तस्य मदं मथ्नातिस्म क्विप् तस्य शिवस्य प्राणेश्वरासौ शिवस्य हृदम्भोजस्थिता संहाररूपिणीति, तोड़लतन्त्रे, ईश्वरेति ईशेर्वरप्रत्ययान्तादाप्रत्ययः ईप्रत्ययस्त्वौणादिकवरट् प्रत्ययान्तादिति। २ ॥

इन्दीति। नारीनयनादौ नीलोत्पलादिभ्रमशालिनां रागिनां मोहं निरसितुं कारणोपन्यासद्वारा जुगुप्सितत्वं प्रतिपाद्य मोहकारणमप्युल्लिखति। वेधाः स्रष्टा ह भोः नयनम् इन्दीवरेण न घटितवान् मुखं नाम्बुजेन दन्तं न कुन्देन अधरं न पल्लवेन अङ्गानि न चम्पकदलैः, तर्हि केनेत्याह पलेन मांसेन अत्र पलपदं जुगुप्सितत्वसमवायिसामग्री-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

एको हि खञ्जनवरो नलिनीदलस्थो दृष्टः करोति चतुरङ्गबलाधिपत्यम् । किम्वा करिष्यति भवद्वदनारविन्दे जानामि नो नयनखञ्जनयुग्ममेतत् ॥४॥ ये ये खञ्जनमेकमेव कमले पश्यन्ति

सम्भारोपलक्षणं तेन दत्तम् इत्यनेनान्वयः संगच्छते, ननु तदा कथमेवं प्रतिभास इत्याह चेतो मनः कान्तिकथं कान्ताकमनीया इकथा कामकथा यस्य तादृशं विधाय कृत्वा नयनादिकानिन्दीवरादिनेव घटितवान् तस्मात्-कामानुरागादेव जुगुप्सितेऽपि वस्तुनि रमणीयताप्रतिभासत इति सर्वथा कामस्य परित्यागः करणीय इत्युपदेशः । नवपल्लवेनेत्यत्र न वेति पदद्वयं नञ् निषेधार्थः वशब्द-इवार्थः वरुणे वः समाख्यात इवार्थे च तदव्ययमिति कोषः । पलमुन्मानमांसयोरिति मेदिनिः । इकारः कथ्यते काम इत्येकाक्षरकोषः ॥ ३ ॥

एक इति । एकः केवलो ब्रह्मरूपः पदार्थः जनवरः जनमुत्पत्तिं वरति निवारयतीत्यच् भवच्छेदक इत्यर्थः वृञ आवरणे वा चुरादिः । निवरते नित्यं प्रजोपद्रव-मित्यस्यैव प्रयोगः नलिनी प्रधानपद्मं सहस्रदलाख्यं तद्दलसमिपकर्णिकान्तर्गतो दृष्टः प्रत्यक्षीकृतश्चेत् खं निरतिशयसुखं करोति ब्रह्मानन्दस्य सर्वानन्दातिशयित्वात् नन्वेवं विदुषा भवता स किं न निरीक्ष्यते, आह-एतन्नयनखञ्जनयुग्मं तं न आह द्रष्टुं न प्राप । अतो नाहं विन्दे न लभ इति आद्वत्योभयत्रान्वीयते, अभावार्थोऽशब्दो

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

दैवात् क्वचित् ते सर्व्वे कवयो भवन्ति सुतरां प्रख्यातभूमीभुजः। त्वद्वक्राम्बुजनेत्रखञ्जनयुगं पश्यन्ति ये ये जना स्ते ते मन्मथवाणजालविकला मुग्धे किमत्यद्भुतम्॥ ५॥ झटिति

वा प्रश्ले षः। अभावे नह्यनोनापीत्यमरः। खञ्जनरूपनयनस्य नैसर्गिकलौल्यं ख्यापितं, किंभूतं भवत्, भ्रान्तियुक्तम्। भः पुंसि भार्गव भ्रान्त्योरिति कोषान्तरम्। ज्ञाननयनावलोक्यस्य कुत एतन्नयनावलोक्यत्वं ज्ञाननयनैतन्नयनयोर्वैलक्षण्यं दृष्टान्तेन साधयति। वद कथय अजानां छागानाम् इनो नेता किं तुरङ्गवलाधिपतेः कर्म्म करिष्यति तस्माद् यथा अजपालतुरङ्गपालयोः पशुपालत्वाभेदेपि कर्म्मणि महद्वैलक्षण्यं तथैतन्नयनज्ञाननयनयोरपि अवलोकनकारणत्वाभेदेऽपि महद्वैलक्षण्यमिति। आधिपत्यम् इति कर्म्मणि यण् ब्राह्मण्यमित्यादिवत्। खमिन्द्रिये पुरे क्षेत्रे शून्ये विन्दौ विहायसि। संवेदने देवलोके शर्म्मण्यपि नपुंसकमिति मेदिनिः। इनः पत्यौ नृपार्कयोरिति च॥ ४॥

ये ये इत्यादि। ब्रह्मरूपिणीं स्तौति ये ये कवयो योगपण्डिताः कवय इत्यत्र क्षतिन इति प्रायः पाठः एकमेव ब्रह्मरूपं दैवात् भाग्यात् क्वचित् स्थले गृहे तपोवने वा पश्यन्ति, ते सर्वे सुतरां अतिशयेन प्रख्याता या भूमीस्थानं सत्याख्यं तद्भुजो जायन्ते। भूमौ क्षितौ स्थानमात्रे इति वैजयन्ती। कुत्र कमले सहस्रदलाख्ये किं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रविश गेहं मा वहिस्तिष्ठ कान्ते ग्रहणसमयवेला वर्त्तते शीतरश्मेः। तदिह विमलकान्तिं वीक्ष्य नूनं स राहुर्ग्रसति तव मुखेन्दुं पूर्णचन्द्रं

भूतम् अखं पाणिपादादीन्द्रियरहितं तथा च अपाणिपादो जवनो ग्रहीतेत्यादि तथा जनं जनयतीत्यच् सर्वोत्पादकमित्यर्थः। तदीयस्फुलिङ्गानामेव जन्तुरूपत्वात्। हे मुग्धे! त्रैलोक्यसुन्दरि भगवति ये ये जनास्तव खं चरणरूपमिन्द्रियं पश्यन्ति तथा तदीयमम्बु धावनतोयं पश्यन्ति सेवन्ते धातूनामनेकार्थत्वात् ते ते अत्रजने जन्मनि कलाः कं सुखं लान्ति सुखिन इत्यर्थः जनयुगं जन्मद्वयं न पश्यन्ति एतज्जन्मनैव तेषां जन्मसमाप्तिर्भवतीत्यर्थः। एतेनैहिकपारत्रिकाभिमतसम्पादकत्वम्। अत्रापिशब्दः प्रश्नेऽश्नःत्वद्द्रष्टा त्वदीयस्तावकेन सह सोऽपि तथैव स्यादित्यर्थः इतीदं किमद्भुतं नाद्भुतमित्यर्थः। तस्माद्ब्रह्मावलोकत्वचरणावलोकादिनोस्तुल्यत्वमिति। वक्तीति वचनमिह स्तुतिरूपतया परिणमति। अत एवार्थान्तरसंक्रमितवाच्यो ध्वनिरयं लक्षणामूलः प्रयोजनञ्च स्वच्छन्दप्रसमरत्वप्रतिपादनं तथा च भरतः अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतमिति अत्रैवोदाहृतं काव्यप्रकाशकारेण त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति। आत्मीयां मतिमादाय स्थितिमत्र विधेहि तदिति, अत्र वचनायुपदेशादिरूपतया परिणमति। खं किम्भूतं मन्मथबाणजालवि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

विहाय ॥ ६ ॥ कस्तूरीवरपत्त्रभङ्गनिकरो मृष्टो न गण्डस्थले नोलुप्तं सखिचन्दनं स्तनतटे धौत

मन्मथं कामं वातिस्म हिनस्तिस्म वा गतिगन्धनयो: अत्र गन्धनं हिंसा वसुगन्ध अर्द्दन इत्यस्य प्रयोगात् स शिव-स्तस्य प्राणजालं प्राणजालं व्ययति संवृणोति व्येञ संव-रणे क्विपि संप्रसारणं तद्दीर्घमन्त्यमिति दीर्घत्वे नपुंसक-लक्षणो ह्रस्व: पञ्चेन्द्रियाणि सोमोऽग्निर्वायु: सत्वं रज-स्तम:। भूतात्मा च मनश्चेति प्राणा: प्रोक्तास्त्रयोदशेत्या-युर्वेदे इयमत्रागमवार्त्ता हृदयावस्थितया भगवत्या भग-वान् खलु संहारादिविमुर्यदा सा व्यक्तरूपा भूत्तदा ता हृदयाद्बहिर्गतामाकलय्य शिव: शवरूपोऽभूदिति। प्राणेति अणप्राणन इत्यतो दैवादिकाद् घञ मृद्वन्यन्तोय-मिति वोपदेव: रमानाथेनाप्येक इत्यनेन तन्मतमनुगृ-हीतम् ॥ ५ ॥

झटितीत्यादि। कस्यचिद्योगिनोऽयमुपदेश:। झटि-ति शीघ्रम् अशीतरश्मे: अशीता अनलसा: सर्वतो विस्-मरा रश्मयो ज्योतींषि यस्य तस्य परमब्रह्मण:। यद्वा हे अशीत अनलसरश्मे मंहाज्योति:स्वरूपस्य ब्रह्मण इति तस्य गेहं स्थानं सत्यलोकाख्यं प्रविश कुच कान्ते कं शिरस्तत्र अन्तमब्द: स्वरूपे शिरोऽत्र सुमेरोरेव तत्रैव सत्यलोकावस्थानात्। तदुक्तं भगवता शिवेन श्रीनि-र्वाणतन्त्रे ज्ञानपद्मस्योर्द्धदेशे सहस्रदलपङ्कजम्। अधो-वक्त्रं हि तत् पद्मं सुमेरोर्मूर्ध्निसंस्थितम्। इत्युपक्रम्य

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

न नेत्राञ्जनम् । रागो न स्खलित स्तवाधरपुटे ताम्बूलसम्बर्द्धितः किं रुष्टासि गजेन्द्रमन्दगमने किंवा मृदुस्ते पतिः ॥ ७ ॥ समायाते कान्ते

पद्ममध्ये वीजकोषे भुवनानि चतुर्दश । स्थानं बहुविधाकारं सर्वदेवस्य चाश्रयम् । तन्मध्ये सत्यलोकञ्च महारुद्रस्य कारणमित्यादि । वहि भूर्लोकादिषट्के मा तिष्ठ कुत इत्याह, इह वहि स्तव ग्रहणसमयवेला वर्त्तते ग्रहणं कालग्रस्तता तस्य समयो निश्चयः स एव वेला वेष्टनं साऽस्ति भूलोकादिषट्कस्यानित्यत्वात् तत् स्थानमप्यनित्यमिति । कथं प्रवेष्टव्यमित्युपायमुपदिशति मुखेन्दुं वीच्य मुखे मुखसमीपे इन्दुर्यस्य तं चन्द्रशेखरमाराध्य । सत्यलोकस्याविनश्वरत्वमितरेषां तद्व्यतिरेकञ्चोपपादयति स मुखेन्दुः शिवो रुद्ररूपेण तद्ब्रह्मयोगिहं विहाय ग्रसति सर्वमित्यर्थः । राहुः पूर्णचन्द्रमिवेति लुप्तोपमा विमलकान्तिमिति मुखेन्दुविशेषणम् । शीताऽलसे च बहुवारतरौ च दृष्ट इति धरणिः कांशिरोऽम्बुनारित्यमरः । अन्तं स्वरूपे नाशे ना नस्त्रीशेषेऽन्तिके त्रिष्विति मेदिनिः ॥ ६ ॥

कस्तुरीत्यादि । अकृतमानसयागस्य कस्यचिदनुशयोक्तिरियम् । हे गजेन्द्रमन्दगमने! गजेन्द्रं मन्दयतीति गजेन्द्रमन्दः सिंहस्तेन गमनं यस्याः हे सिंहवाहिनीत्यर्थः । मम स्तनतटे स्तनसमीपे हृदयेऽनाहताख्यसरोजावच्छिन्नमानसयागविषये, तव गण्डस्थले कस्तूर्युत्तमचित्रविशेषव्यूहः नमृष्टः न दत्तः । किमित्याचेपे चन्दनं नोलुप्तं किन्तु

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कथमपि च कालेन बहुना कथाभिर्देशानां सखि-रजनिरद्धं गतवती ततो यावल्लीलाकलहकुपितास्मि प्रियतमे सपत्नीव प्राची दिगियं समभवत्तावदरुणा ॥८॥ स्वाधरं नीरसकाष्ठताडनशतं

विच्छिन्नमेव तदपि न दत्तमित्यर्थः। तवाधरपुटे ताम्बूलजनितो रागोनोऽस्माकं सम्बन्धेन किं स्खलितः ताम्बूलमपि न दत्तमित्यर्थः। मृदुरिति रागविशेषणम्। तथा नेत्रनायकेन शिवेन सह ते तव अञ्जनं मिलनं न धौतं न चिन्तितं ध्यानोपयुक्तस्थाने शिवेन सार्द्धं तव सुखासिकापि नध्यातेत्यर्थः। हे सखीति शिवस्येत्यर्थात् यद्वा हृदय विशेषणमेतत् तथा हि सखायमाचष्टे गृह्णाति वेत्तीनन्तात् क्विप्। तथा च चेतसो मिथ्या ज्ञानप्रयोजितमित्रानुरागवशादेवायमस्माकमनर्थ इति। पति स्वं किं दृष्टासि पतिः सर्वेश्वरो पतिः स्त्रियामपि वर्त्तत इति श्रीपतिः अतएवामरेणापि विशेष्यनिघ्ने उक्तः न स्खलित इति शषसेष्वघोषपरेषु इत्यादिना विसर्गलोपः ॥ ७ ॥

समायात इत्यादि। प्राग्विविक्तस्य पश्चादसत्सङ्गेन ततो भ्रष्टस्य कस्यचिदनुशयोक्तिं वर्णयति देशानामुपदेष्टॄणां कथाभि र्बहुना कालेन कथमपि कष्टसृष्टिप्रकारेण अकान्तकं सुखं तद्वीपरीतमकं तस्य सांसारिकदुःखस्यान्ते नाशे समायाते संप्राप्ते सखिरजनिरर्द्धं सख्युर्मोहसहायभूतस्य रजस्य मध्यमगुणस्य निरर्द्धं ऋधु वृद्धौ घञि अर्द्धोवृद्धिस्तस्याभावेन वा तृतीयासप्तम्योरित्यम्। प्रियतमे

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्लाघ्यः प्रचण्डातपः क्लेशः श्लाघ्यतरः सुपङ्कनिचयैः श्लाघ्योऽतिदाहानलः । यत्कान्ताकुचपार्श्वबाहुलतिका हिल्लोललीलासुखं लब्धं कुम्भवर त्वया न हि सुखं दुःखैर्विना लभ्यते ॥ ६ ॥

पुराटो लीला गतवती नष्टा । ततोऽनन्तरमसतसंसर्गेण यावदहं कलहकुपितास्मि कलहस्य कुत्सितः पिता जनकोऽस्मि, तमः समुदयात् तावत् सपत्नीव सपत्नः शत्रुस्तस्य स्त्रीव इयं प्राचीदिक् प्राचीनादिशा पूर्वावस्था भवत् किंभूता अरुणा अरुणयति क्रोधादिना विकृतिजननीत्यर्थः । सुखशीर्षजलेषु कमिति मेदिनीकरः । रजो रेणीपरागे स्यादार्त्तवे च गुणान्तरे इति जान्ते स एवात्र अर्थः पादरजोपमा इत्यस्य प्रयोगः । एतावता ह्यसतसंसर्गस्य विवेकभङ्गहेतुत्वेन सर्वथा परिहरणीयत्वमित्यवधेयम् ॥ ८ ॥

श्लाघ्यमित्यादि । हे कुम्भवर ! कुम्भं कुम्भकं प्राणायामाङ्गं वृणुते अर्जयति यस्तदामन्त्रणं वृङ् सम्भक्तौ अच् यद्वा कुम्भो वारस्त्रीकामुकस्तं वरति वारयति असत्संसर्गाद्धेनेत्यर्थः । कुम्भप्रमाणमग्रे वच्यते । यद्यतः कान्तायाः कुचादीनां हिल्लोलस्य दोलनस्य या लीला तद्रूपा वा लीला तत्सुखं त्वया न हि लब्धम् । कान्तासंसर्गपरित्यक्तः, अतस्ते नीरसकाष्ठताड़नशतं श्लाघ्यं रसस्याभावो नीरसं तत्र काष्ठा उत्कर्षो यस्य तस्य भावस्तत्ता तया तस्या वा अड़नशतमुद्यमशतं श्लाघ्यम् । अड़ उद्यमे युट्, । पङ्कनिचयपदं सकलदुर्गोपलक्षणम् अन्यत् सुबोधम् । ननु कान्तासुख

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

किं किं वक्त्रमुपेत्य चुम्बसि बला न्निर्लज्ज लज्जा क्व ते वस्त्रान्तं शठ मुञ्चमुञ्च शपथैः किंधूर्त्त-वाग्बन्धनैः। खिन्नाहं तव रात्रि जागरव-

परित्यागपूर्वकप्रचण्डातपादिक्लेशसहिष्णुतया परत्रापि सुखमुत्पादनीयमिति, क्लेशानर्थक्यमाशङ्क्य समाधत्ते सुखमित्यादि दुःखैरैहिकैर्विना सुखं भृशम् अतिशयितं खं शर्म्म नलभ्यते विना इत्यतः अकारः प्रश्लेष्यः, तस्मात् चणिकैहिकसुखनिरसनेन प्रचण्डातपादि यत्किञ्चिद्दुःख स्वीकृत्यापरत्र निरतिशयसुखसम्प्राप्तिरिति कुतः क्लेशा-नर्थक्यमिति। काष्ठोत्कर्षे स्थितौ दिशीत्यमरः। हिल्लोलत् कण्ठदोलन इति वोपदेवः। सु पूजायां भृशार्थे चेति मेदिनिः। खशब्दप्रमाणं प्रागुक्तम्॥ ८॥

किं किमित्यादि। कश्चिद्योगी काञ्चिदुपदिशति। हे निर्लज्ज ते लज्जा क्व गता किं किमित्याक्षेपे वक्त्रमुपेत्य बलादनौचित्यात् चुम्बसि सुखमस्तीति कृत्वैव सकलपदार्थं स्वेच्छया स्तोकं स्तोकं प्रस्तौषि सिद्धान्तानिवर्हणेन सर्व्वेषां किञ्चित् किञ्चित् प्रस्तावस्तु स्वकं, शपथैः प्रियाभि-रस्पर्शादिभि र्मिथ्यानिरसनैः शठ शाठ्यं मुञ्च त्यज, शठ कैतवे भावे क्विप् धूर्त्तवाचां बन्धनैः किं छलवागुपन्यासैः किं शपथैः मूर्त्तिं रागोप्यते इति पाठे शाठ्यं मया न कारि-ष्यते तत्रामी शपथाः प्रत्ययका इत्युक्तावपि शपथैः किं शाठ्य-स्य मूर्त्तिः स्वरूपमागोप्यते आच्छाद्यते शपथेषु कृतेष्वपि कृतं शाठ्यं स्वयमेव प्रकाशत इत्यर्थः। अनन्तरं कर्त्तव्यमपदि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

थात् तामेव या हि प्रियां निर्म्माल्योज्झित पुष्पदामनिकरे का षट्पदानां रतिः ॥ १० ॥

वाणिज्येन गतः स मे गृहपति वार्त्ताऽपि न

श्रुति, हन्तानुकम्पादौ या वरा श्रेष्ठा ए शिवाय खिन्ना तं दृष्टु व्याकुला इत्यर्थः तामहिप्रियां कुलकुण्डलिनीं तं उं शिवञ्च अव संयोजनेन प्रणोहि, किं कृत्वा निर्म्माल्य, मलमल्लधारणे वायुं धारयित्वा इत्यर्थः प्राणमन्त्रोच्चारणपूर्व्वकवायुसन्धारणेन तयोः संयोगात् । एतेन मन्त्रचैतन्योपाय उपदिष्टः सा कोट्टश्री त्रिषु गुणेषु सत्वादिषु जागरोऽवबोधस्तस्य वशं मतति सततं प्राप्नोति अत सातत्यगमने क्विप्, तां कोट्टश्रीम् अवस्त्रां वस्त्रपटमावरणमात्रोपलक्षणं निरावरणां स्वतन्त्रामित्यर्थः । शठमित्यतोऽनन्तरम् उच्चेति पदद्वयम् । उकारः शङ्करः प्रोक्त इत्येकाक्षरकोषः । तामित्यत ए इति चतुर्थ्यन्तम् आः स्याच्छङ्करवेधसोरिति धरणिः । नित्यं कर्म्मणि तुमोऽपयोगिण इति चतुर्थी आधातोरित्यत्र धातुग्रहणस्याग्रहोपलक्षणत्वाल्लोपि प्रत्ययमात्रं पदं ततः अदेति क्रियापदम् । तयोः प्रीतिरन्यतो न सम्भवतीति साधयितुमाह उज्झितेत्यादि षट्पदानां भृङ्गाणाम् उज्झितपुष्पदामनिकरे उज्झितमलब्धं पुष्पदाम येन तादृशि समूहे का रतिः प्रीति र्नकापीत्यर्थः यथा मधुरवस्त्वन्तरलाभेऽपि मकरन्दालब्धराभृङ्गाणां न प्रीतिस्तथा तयोर्नान्यां व्याप्यप्रीतिरिति । स्तोमौघनिकर व्रात वारसंघात सञ्चया इत्यमरः ॥ १० ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्रूयते प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता । बालाहन्नवयौवना निशि कथं स्थातव्य मस्मद्गृहे सायं संप्रति वर्त्तते पथिक हे स्था-नान्तरे गम्यताम् ॥ ११ ॥

वाणिज्येनेत्यादि । कस्यचिज्ज्ञानात्मनः परामर्शोऽयं सगृहपतिः गृहस्य देहरूपस्य पतिर्जीवात्मा वाणिज्येन हेतुना मातृगेहं मातृगर्भरूपंस्थानं गतः भारतभूम्यवतर-णस्याभिमतफलसम्पादकत्वसम्भावनात् । प्रातः सृष्टि समये प्रातः पदं सृष्टिकालपरम् । निशापदं चयकालप-रम् । दिनरात्र्योरुदयचयकत्वेनोक्तत्वात् । अजो विष्णुः सम्बन्धित्वेन विद्यते यस्याः सा अजा वैष्णवीमाया न जायत इत्यन्यतोऽपि चेति डः प्रत्ययो वा नित्येत्यर्थः तत्र गतासती अहन् कर्त्तव्य विस्मृतिमुत्पाद्य तं हतवती गतस्य मे गृहप-तेरिति षष्ठ्यन्तपाठे हिंसार्थत्वात कर्म्मणि षष्ठी बोध्या कीदृशी प्रसूततनया प्रसूर्माता तयैव ततः प्रकटितः नयो-नीतिर्यया । एतेन मायाचरितमहितं तेन न ज्ञायत इति । यथा—बाला बालं मूढं करोतीति इनन्तादच् मोहजननी-त्यर्थः मूर्खेऽर्भकेऽपि बालः स्यादित्यमरः । तथा अवयौवना वृद्धाचिरन्तनीत्यर्थः । प्रतिक्षणमजीर्णतया प्रतिभानान्नव-यौवना वा अतोऽस्मत् सकाशात् तज्जननी वाणिज्यजननी वार्त्तापि नश्रूयते तेनेतिशेषः तत्रावज्ञायत इत्यर्थः निशि-चयकाले गृहे स्थूलशरीरे कथं स्थातव्यं तदानीं स्थातुं नशक्यत इत्यर्थः । सामाया अयं आत्मा पथि वर्त्मनि वर्त्तते

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यामिन्येषा गहनजलदैर्वद्धभीमान्धकारा
निद्रां यातो गृहपतिरसौ क्लेशितः कर्मदुःखी
बालाचाहं मनसिजभयात् प्राप्तगाढप्रकम्पा
ग्रामस्त्वेतैरयमुपहतः पान्थनिद्रां जहीहि ॥१२॥

संप्रतिमिमया कहे कं यमं हन्ति यमाविषये स्थानान्तरे स्थानविशेषे सत्याख्ये गम्यतां नीयताम् इनन्तात् पञ्चमी परमब्रह्मणि लीनीक्रियतामित्यर्थः जयजयह्यजामजित दोष ग्रभीत गुणामिति श्रुत्यध्याये अजां मायां जहीति श्रीधरस्वामी व्याचष्टे । को ब्रह्मणि समीरात्मयमदत्तेषु भास्करइत्यादि मेदिनिः । ते इतिस्वात्त्वयेत्यर्थेमयेत्यर्थे च मे इतीतिपुरुषोत्तमः ॥ ११ ॥

यामिनीत्यादि । कस्यचिन्मनीषा जीवात्मनः प्रबोधाय प्रयतते हे गहन जलदरूपैर्दुष्कर्मभिर्वद्धा एषा संसृतिरूपा यामिनी यमसम्बन्धवती भीमा अन्धकारा अन्धयतीत्यन्धकारा । बन्धनालयः कारा स्याद्बन्धनालय इत्यमरः । असौ गृहपतिः साक्षिरूपः परमात्मा अनिद्रां जागरणं यातःजागरूकः सकलं पश्यतीत्यर्थः कीदृशः क्लेशितः उत्तमः यतः कर्म-दुःखी कर्मणा त्वदीयेन दुःखवान् । यद्यपि साक्षिणः पारमार्थिकदुःखं नास्ति तथापि अनुचितदर्शनाद्यागन्तुकं तदिति । अहञ्चबाला मनःसमुत्पन्नभयात् प्राप्तातिशय-कम्पा, अयं ग्रामो देहरूपश्चौरैरिन्द्रियाख्यैरुपहतः । हे पान्थ पथिक निद्रामज्ञानं जहीहि त्यज । पान्थेति साक्षे-पसम्बोधनं यथा कश्चित् पान्थो गृहस्थस्य चतिहदारोरुदा॰

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

२४५०
संस्कृतकाव्य ६१
२४५०
संस्कृतकाव्य ६१

इयं व्याधायते बाला भुरस्याःकार्मुकायते ।
कटाक्षाश्च शरायन्ते मनोमे हरिणायते ॥१३॥

क्व भ्रातश्चलितोऽसि वैद्यकगृहं किन्तव
शान्तीरुजां किन्ते नास्ति गृहे सखेप्रियतमा
सर्वान् गदान् हन्ति या । वातश्चेत् कुचकुम्भम-
र्दनवशात्पित्तञ्च वक्त्रामृतात् श्लेष्मानं विनिहन्ति
हन्तसुरतव्यापारकेलिश्रमात् ॥ १४ ॥

सोनतामवलम्बते तथा त्वमप्युत्पद्यमानेऽप्यात्मनो दुष्कर्म-
ण्युदासोनतामाचरसीति ॥ १२ ॥

इयमित्यादि । कश्चिज्जितेन्द्रियः स्वभावं प्रकटयति । मे मम मनोहरिणाक्षणेन सह हेतुना वा अयते गच्छति अत इयं बाला व्याधवदाचरतीत्यादि स्फुटं बालादीनां घातुकत्वेन न तत्र मे मनः प्रवृत्तिरितिभावः ॥ १३ ॥

क्वभ्रातरित्यादि । हे भ्रातः क्वचलितः प्रस्थितोऽसि, स आह वैद्यकस्य प्रशस्तवैद्यस्य गृहं प्रष्टा पुनराह किन्तव गृह इति स आह रुजां शान्तिरिति । प्रष्टा भूयोवदति हे प्रिय हे सखे तेन वैद्यद्वाराकृतशान्तिरूपेण कर्मणा किं कृत इत्याह तमाकालरात्रिरस्ति या सर्वान् हन्ति तस्माद्रोगनाशशान्त्यापि न सुखमित्यर्थः । ननु यद्येवं तदा किं विधेयमिति तदाचरितमुपदिशति अतः कारणात् चेत् जाता सुरतव्यापारके कुत्सिते सुरतव्यापारेऽलि अना-सक्त सन् श्रमात्तपः करणात् पित्तं श्लेष्माणं दोषमात्रोप-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

दृष्टिं देहि पुनर्बाले कमलायतलोचने। श्रूयते हि पुरालोके विषस्य विषमौषधम् ॥१५॥

लक्षणमेतत् तज्जन्यान् गदान् वा रोगांश्चविनिहन्ति तथा कुं पृथ्व्यादिपञ्चभूतञ्चविनिहन्ति पञ्चानामेकतमविध्वंसे सर्वेषामेव विध्वंसात् निर्वाणमासादयतीत्यर्थः। अत्र हेतुगर्भं तपोविशेषणं वक्त्रामृतात् वक्त्रे मुखेऽमृतं मोक्षो यस्य वशीकृतमोक्षादित्यर्थः। हे कुच सङ्कुचित जड़ेति यावत्। भं भ्रान्तिं रोगशान्तिप्रयत्नादिरूपां न अर्ह न प्राप्नुहि भ्रान्तिं त्यजेत्यर्थः। अर्हंगतौ याचने च वशादितोन्द्रियवशीकरणात् तस्मान्मरणस्यावश्यंभावित्वेन तपसैव सकलोपतापशान्तिः कार्य्या नान्यथेति। तमा घृताची रात्रिः स्याद्दासरा यामिनीतमीति रभसः। दारा-महादेवरतातमात इत्यस्यैव प्रयोगः। चेर्दाति चित संवेदने चरादिः, इनो लोपे प्रत्ययलोपलक्षणेन गुणः। मुक्तिः कैवल्यनिर्वाणं श्रेयो निःश्रेयसामृतमित्यमरः। अलोति लोङ् श्लेषणीभावे क्विप् न विद्यते लोरासक्तिर्यं-त्वेति क्रियाविशेषणस्य नपुंसकत्वाद्ध्रस्वः अमादिति अमु तपसि खेदेचेत्यतो घञ्॥ १४ ॥

दृष्टिमित्यादि। कश्चिद्भगवतीं संनिवेदयति। हे कमलायतलोचने कमलाया लक्ष्म्या आयमागमं तनोति डः ताहश लोचनं दर्शनं यस्यास्त्वद्दर्शनादेव लक्ष्मीलाभः स्यादिति। बाले शिशोमयि पुनर्दृष्टिं देहि, ननु मद्दर्शनात् कतिदानवा भस्मीभूतास्ततस्तेन किमित्याशङ्क्याह, तवेयं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अन्तर्गता मदनवह्निशिखावली या, सा बाधते किमिह चन्दनचर्च्चितेन । यः कुम्भकारपवनो परिपक्कलेपस्तापाय केवलमसौ नच तापशान्त्यै ॥ १६ ॥

दृष्टिरहिपुरालोके, अहीनां क्रूराणां शत्रूणां पुरस्य शरीरस्यालोके विषं श्रूयते श्रुतिवाक्येभ्यः शाब्दबोधविषयीक्रियते, आत्मा श्रोतव्य इति वत् अन्यत्र विषस्यौषधमिति, अतो दृष्टिपातादहं कृतार्थः स्यामितिभावः । बाल इत्यनेन विपक्षपक्षाद्भेदः प्रतिपादितः । अहिर्वृत्रेप्यहिः क्रूरेऽप्यहिः सर्पेस्मृतो बुधैरिति धरणिः । देहे पाटलिपुत्रे च पुरं स्याद्गुग्गुलौ पुर इति पुरुषोत्तमः ॥ १५ ॥

अन्तर्गता इत्यादि । काममुखस्य पारमार्थिकदुःखजनकत्वं साधयितुमाह । हे मदन काम, अन्तर्गता वह्निशिखा ज्वलनज्वालेव देदीप्यमानत्वात् आत्मेत्यर्थः । अवलीय लीनीभूय आसास्थिता, अतो द्रष्टुं न शक्यत इत्यर्थः । हे बाध हिंसक इह आत्मनि ते तव चन्दनचर्च्चितेन सुखावलेपेन किं किमपिनेत्यर्थः । प्रत्युतदुःखजनकतां साधयति, य इत्यादिव्यक्तप्रायम् । पवनं कृतपात्रपाकार्थं कुम्भकाराणां गर्त्तभेदः पुट्टन इति ख्यातः । पवनं कुम्भकारस्य पाकस्थाने नपुंसकम् । निष्पाव मरुतोः पुंसीतिमेदिनिः । चन्दनेति, चदि आह्लादने दीप्तौ चेत्यतो युट् । बाध इत्यामन्त्रणपदस्यासिद्धत्वेऽपि आसा इति पूर्वतरपदमाश्रित्य ते इत्यादेशः ॥ १६ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

दृष्ट्वा यासां नयनसुषमां वङ्गवाराङ्गनानां
देशत्यागः परमकृतिभिः कृष्णसारैरकारि ।
तासामेवस्तनयुगजिताः कुम्भिनः सन्तिमत्ताः
प्रायोमूर्खःपरिभवविधौ नाभिमानं तनोति ॥१७॥
अपूर्व्वा दृश्यते वह्निःकामिन्याःस्तनमण्डले ।
दूरतो दहते गात्रं हृदिलग्नस्तु शीतलः ॥१८॥

दृष्ट्वा इत्यादि । कृष्णः सारो येषां तैः कृष्णपरायणैः । वङ्गवाराङ्गनानाम् उखनखेत्यादिना दण्डके वगिगत्यर्थः वङ्गं गमनं वारयन्ति दर्शनालापनादिना तादृशीनामङ्गनानां नयनयोः सुषमामुत्कृष्टां कान्तिम् आयासो व्यामोह स्तत्कारिणीं दृष्ट्वा ज्ञात्वा तद्विशिष्टदेशत्यागः कृतः । अस्तु तावदालापसम्भोगादिव्यापारो लोचनचातुरीमेव व्यामोहसम्पादिकां सम्भाव्य तपोवनं गतमित्यर्थः । तासामेव स्त्रीणां स्तनयुगजिताः सम्भोगवशीकृताः कुम्भिनः सन्ति, कुम्भी वेश्याकामुक स्तद्विशिष्टा असत् संसर्गेण इत्यर्थः । अत्रार्थान्तरन्यासमाह मत्ता इत्यादि अमूर्खः पण्डितः प्रायः परिभवविधौ परिनिष्पाद्यमानात्माभिभवविधौ अभिमानं ज्ञानं तनोति न मत्ता मूर्खा इति तस्मात् असत् संसर्गपरिहारे पाण्डित्येचावश्यमेव यतनीयमित्युपदिष्टम् । अमूर्ख इत्येकवचनेन विरलत्वं मत्ता इति बहुवचनेनाविरलत्वंप्रत्ययोपदत् । सुषमा परमाशोभेत्यमरः । अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोरित्यपि । कुम्भी वारस्त्रियाः कान्ते रक्षोराशिप्रभेदयोरिति पुरुषोत्तमः ॥१७॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कथमेतत् कुचद्वन्द्वं पतितं तव सुन्दरि ।
पश्याधस्त्वा[illegible]ाम्मूढ पतन्ति गिरयोऽपि च ॥१९॥

अपूर्व इत्यादि । कश्चिज्जितेन्द्रियः कांश्चित् कामजयोपायमुपदिशति । कामिन्याः स्त्रियाः मण्डले न स्त न तिष्ठन कुत इत्याह यतोऽयं दुःपरितापकोऽपूर्वः अङ्गता वह्निर्हि-श्यते कौदृक् शीतलः शीतोऽलसो जड़ इति यावत् । भाव-प्रधाननिर्देशाच्छैत्यार्थः तनाति ददाति जाड्यकृदित्यर्थः । वह्नेः शीतलत्वं विरुद्धमित्यपूर्वत्वमिव तथा दृत जहर्त्ति प्रसह्यकरोति इति क्विप् हृप्रसह्यकरणे जुहो-त्यादिः । तथा इलग्नः श्री कामि सन्तः । अतएतेनोपा-येन इगात कामशरीरं दहत कामं जयतेत्यर्थः । एतेन कामस्य प्रधानसामग्रीभूतकामिनीसंसर्गपरित्यागादेव जयः सुकर इति । तथा च प्रबोधचन्द्रोदये चन्द्रश्चन्दनमिन्दुधामधवला रात्रिर्हि रेफावली झङ्कारोन्मुखरा विलास विपिनः प्रान्तावसन्तोत्सवः । सान्द्रध्वानवनोदयाश्च दिवसा मन्दाः कदम्बानिलाः शृङ्गारप्रमुखाश्चकामसुहृदोनार्य्यां जितायां जिताः ॥ १९ ।

कथमित्यादि । कश्चित् कञ्चित् कलहायमानं हितो-पदेशद्वारा शिक्षयति । हे तद् हे शठक कथंइन् कलहः पतितमुपस्थितं तवेति शेषः । कुच कलहात् सङ्कुचितो-भव कलहं दूरयेत्यर्थः, कुत इत्याह, एतद्वन्द्वम् अधः परकाले खननात् पीड़नाद्दसुमग्निं पश्य जानीहि इशी-ज्ञानित्वचनलात् । एतत् कलहजन्यापूर्वं परलोकेऽग्निरि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कुसुमे कुसुमोत्पत्तिः श्रूयते नच दृश्यते ।
बाले तवमुखाम्भोजे कथमिन्दीवरद्वयम् ॥ २० ॥

बतप्रतीत्यर्थः किम्भूतं दरि साधूनां भयजनकम् । ननु परलोकाभावे कुत एतच्छङ्कत्याशङ्कामुन्मूलयति । हे मूढ़ गिरयो महान्तोऽपि पतन्ति किं पुनस्त्वमल्पक इति, खननात् कालेन खननादित्यध्याहर्तव्यं वा । तथाच न केपि खातारः सुरगिरिपयोधि प्रभृतय इति शान्तिशतके । तकारस्तस्करे गर्भे क्रोड़े पुच्छे तथा शठे इति कोषान्तरम् । द्वन्द्वं कलहयुग्मयोरित्यमरः । देवभेदेऽनलेरश्मौ वसूरत्ने धनेवसुरिति च । अध इति पूर्व्वाधरयोरसिद्ध पुरधोचेति सद्य आयत्वात् साधुरिति । दरीतिदृभये घटादिः दरयतीति णिन् दरशब्दाद्भवार्थान्मत्वर्थीयो वा जन्यतासम्बन्धेनान्वयः ॥ १९ ॥

कुसुम इत्यादि । कश्चिद्भगवतीं प्रार्थयते । हे कुसुमे भक्तप्रतिपादितपुष्पविशिष्टे तवकुसुमोत्पत्तिः श्रूयते कुसुमपदं यत्वोपलचणं तत्र तवोत्पत्तिर्मूलयोगेन श्रूयते तथाच जन्मस्थानं महायन्त्रमित्यादि तन्त्रेष्वनुसन्धेयं तव इन्दीवरद्वयोः शोभा कथं न दृश्यते अतो बाले शिशौ मयि दयसेतत् सन्तापस्यगमनं वर वारय प्रत्यचरूपाभवेति प्रार्थना । हे मुखाम्भोजे इति सम्बोधनान्तरं मुखमम्भोजं पद्मं यस्याः हे पद्ममुखीत्यर्थः । यद्वा मुखानि दानवसम्बन्धीनि अम्भोजानीव यस्याः तन्नालाधारणात् । किम्बा मुखे मन्त्रादौ

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अयि मन्मथचूतमञ्जरि श्रवणायतचारुलोचने। अप[illegible]मनः क्वयासि तत् किमराजकमवराजते॥२१॥ कोपस्त्वया हृदिकृतो

अम्भोजश्चन्द्रो बिन्दुरूपोयस्याः मन्त्रादेर्नादयुक्तत्वात्। अथवासुखं सुखस्थानीयोऽम्भोजोऽर्द्धचन्द्रो नादव्यपदेशोयस्याः अस्य च रहस्यं गुरूपदेशतोऽवगन्तव्यं नेहप्रतन्यतेऽप्रकाश्यत्वात्। अजशब्दवव्रतिसंस्कारेणाम्भोजशब्दस्यापि चन्द्रवाचकत्वम्। इन्दिरेन्दोरमालक्ष्मोरिति त्रिकाण्डशेषः। इयमिति दुञ्डपतापि सम्पदादित्वाद्भावेक्विप्। तस्या अयोगमनम् इणधातोरल् बाले इति षष्ठ्यर्थेसप्तमी।२०॥

अयि इत्यादि। कश्चिद्विषयासक्तं चित्तमाक्षिपति। अयि मनस्तत् राजकं न जायतः इत्यजः परमात्माब्रह्मरूपस्तत् सम्बन्धिकं सुखं अपहृत्य विहाय क्व यासि। सम्बोधनत्रयमाह मन्मथः काम एव चूतवृक्षस्तस्य मञ्जरि मञ्जरीशब्देनात्र जन्यत्वेन वीजं लक्ष्यते चूतपदं फलवाचकं वा कामवीजेत्यर्थः कामस्य मनोजत्वात्। हे श्रवणायत श्रवणादयत अनिवृत्त यम उपरमेः क्तः। हे चारुलोचनेऽरगमनकारक। अथवा श्रावणादयत मनिवर्त्तन भावे क्तः, चारुरमणीयं यस्य इत्येकं पदं नपुंसक सम्बोधने पक्षेगुणाभावः आद्येन सम्बोधनेन कामरसानुसारित्वं द्वितीयेन श्रोतव्यान्तरानुसारित्वं, तृतीयेन रूपानुसारित्वञ्च प्रत्यपादि, ततः किंकर्त्तव्यमित्याह भव आजके अस्य ब्रह्मस-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यदि पङ्कजाक्षि, सोऽस्तु प्रियस्तव किमत्र-
विधेयमन्यत् । आश्लेषमर्पयमदर्पितपूर्वमुच्चै-
र्दन्तक्षतं मम समर्पय चुम्बनञ्च ॥ २२ ॥

इति महाकवि श्रीकालिदासविरचितं
शृङ्गारतिलकं समाप्तम् ॥

स्वब्धिसुखस्य षष्ठ्यर्थे सप्तमी, ते विस्तराय राज शोभस्व, ते इति तायृसन्तानपालनयोः भावेक्विप् योर्व्यञ्जन इति यलोपः तत आधातो रित्याकारलोपः विस्तारयितुमित्यर्थः २१ ॥

कोप इत्यादि । कश्चिन्निर्विण्णो लक्ष्मीमाक्षिपति । हे पङ्कजाक्षि । पङ्कजाक्षः पुण्डरीको विष्णुस्तत्पत्नि हे लक्ष्मीरित्यर्थः । यदि त्वया कोपो हृदिकृतस्तदा मम स प्रियो ममाभिलसितोऽस्तु अत्रान्यत्तव किं विधेयं त्वया किंविधातव्यं वाकर्त्तरिकृत्य इति कर्त्तरि षष्ठी । अर्पितपूर्वं मयि पूर्वमाहितं आश्लेषं सम्यक्कं मत् मां विहाय, यवलोपेपञ्चमी अन्यत्रार्पय तथा मम मत्कर्त्तृकं चुम्बनं पल्लवग्राहित्वं धूर्त्ततां वा अन्यत्रसमर्पय श्रियोऽवलेपेनैव तदाश्रयणात्, चुविधातुरत्र धूर्त्तक्रियायां अतश्चुम्बको धूर्त्त उच्यते, तथाच मेदिनिकरः। चुम्बमकश्चुम्बनपरे धूर्त्तायस्कान्तयोरपि इति । किम्भूतं तदुभयं दन्तक्षतं दन्तःसानु पर्वतस्य समभूमिः अत्रतद्गमने लक्षणा तस्यक्षतं क्षतिर्यस्मात् तपोवनगमनव्याघात-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मित्यर्थः । दन्तौ निकुञ्जे दयने दन्तः सानुनि कथ्यतद्-र्तिधराणिः ॥ २२ ॥

शृङ्गं प्राधान्यमियर्त्तीत्यणिशृङ्गारः प्रधानभूतस्तस्य तिलक मिव तिलकम् अलङ्काररूपमित्यर्थः । शृङ्गं प्राधान्य सान्वो श्चेत्यमरः ।

इति वैद्यमहामहोपाध्याय
श्रीमत्कविराजचन्द्र मजुमदार विरचिता
शृङ्गारतिलकटीका सम्पूर्णा ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri